नं० ४३३६-घ

प्रशस्त्रदीपिकाव्याख्याप्रभा सप्तमाष्टमाध्यायौ (पूर्ण)

नं० ४३३६-घ

पत्राणि १-६

4336 / 19

शा·दी·
१

॥ ॥ श्रीमहागणपतये नमः ॥ ॥ अकृतिप्रमाणात्वात ॥ ॥ पूर्वं बध्योपजीवकत्वमुक्तमद्य संगतिरस्याहुः उपदेशो
शः संबंध्यंतरनिरपेक्षमुपकारबोधनमुपदेशः संबंध्यंतरसापेक्षं चातिदेशः प्रकृतौ हि प्रीत्याग्नेयोपकार
बोधनं शेषान्तरनिरपेक्षमितितत्राद्यलक्षणासमन्वयः विकृतौ वाग्नेयवद्धि प्रयाजादेः संबंध्यंतरसापेक्षं प्रा
कृतं गोपकारत्वापनात्प्रतीत्याद्याख्यातिदेशलक्षणासमन्वयः पुरोडाशकपालेन तुषानुपवपतीत्यत्र तुषोपव
पोपकारस्य करणतारूपस्य पुरोडाशेन संबंधो किं त्वाधारतारूपस्येति तु षोपवापोपकारस्य संबंध्यंतर
निरपेक्षस्य बोधनमस्त्येवोपदेशत्वस्य न क्षतिर्न चातिदेशत्वापत्तिः अत एवाग्नेयविहारोपकारपर्यंतानुधा
वनमिति दिक् ॥ तद्धर्मानेति संबंध्यंतरसापेक्षत्वादतिदेशस्येति भावः वाधादीत्यादि नात्र प्रसंगस्य ग्रहः त
दर्थमिति सर्वार्थवव्यवस्थयोरुपयोगित्वेनेत्यर्थः पूर्वार्थत्वं तत्प्रयुक्तत्वे हेतुः ननु नवमाद्यन्यायेनापूर्वा
र्थत्वस्याप्यावश्यकत्वात्तत्प्रयुक्तत्वाद्यतश्चाहुः प्रथममिति असिद्धस्य करणतापरोगात्प्रथमं तत्प्राग
कर्मकभावनाऽवगमात् तदन्वितानां तत्त्वारात तत्करणका पूर्वभावनासंबंध इति पूर्वभावगतत्वागभावनाप्र
युक्तत्वेवापूर्वभावनयाग्रहणमिति भावः इतीति प्रागकर्मकभावनायाविश्रुतौ प्राप्तत्वेन धर्माकांक्षापा
अभावादपूर्वभावनेति कर्तव्यतात्वेन तत्रैवान्वयोत्तरं प्राथमिकप्रयागसंबंधादपूर्वार्थत्वं तत्प्रयुक्तत्वं चेति

रम
१

भावः एवंकरणान्वयपूर्वकोपूर्वभावनान्वयः उतापूर्वभावनान्वयपूर्वकः करणान्वय इति संदेहः इति फलितं·
तत्रयागसंबंधस्य तदुद्देशेन विधानाधीनत्वाद् उद्दिश्यमानस्य च नाम्ना विशेषणायोगात्कर्मणां सर्वयागार्थत्वे
माघपक्षे· द्वितीयेऽपूर्वभावनयाविधीयमानयैतद्धर्माणामन्वयात्तस्याश्च शक्यं तत्ताद्भिर्भेदावगमात्तत्क
रणेनैवान्वय इति व्यवस्थेतिद्वैधं धर्माणामिति अपूर्वभावनेतिकर्तव्यतायास्त्वाप्यकरणानुग्राहकत्वनियत
त्वादिति भावः एवं च करणान्वयपूर्वक एव भावनान्वयो वाच्यः अन्यथा करणानिरपेक्षभावनान्वये कर
णात्तु न्यूनतया तादर्थ्यानुपपत्तेरित्यर्थः प्रयाजादिवाक्येषु करणवाचकशब्दाभावात्कथं तदुद्देशेन विधिरिति पृ
च्छति· केनेति· प्रकरणशब्देन यागाकांक्षा विवक्षिता न तु भावनेतिकर्तव्यताकांक्षेति न प्राथमिकयागसंब
धानुपपत्तिः नन्वेवं सिद्धान्तेऽपि सर्वभावनार्थत्वं शब्दसामर्थ्यादापद्येत तस्याशंकानिरासार्थमाह· न चेति· वै
रूप्यं· वा अपेयाधिकरणोक्तं चित्तरुद्वित्रिकद्वयं· कर्तव्यत्वोपस्थित एवेति कर्तव्यतान्वयात्कर्तव्यत्वं करणत्व
पेक्ष्य युगपदेकत्रावगन्तुमशक्यत्वादिति भावः· सिद्धान्ते तु करणेतिकर्तव्यतोभयविशिष्टभावनाविध्युत्तरं
यार्थिककरणान्वयाद्वैषम्यमित्याशयः· पदस्य [illegible] न वाक्यैकवाक्यतारहितैः सन्निधानादिभिः· तद्वा
क्यैः अनुमतेति· सन्निधोपनतानीति प्रयाजेतरवैरूप्येरित्यर्थः· आकांक्षेति· सामान्यान्वयबोधहेतुर्न तु विशेषणे

समर्पिकेत्यर्थः यदि तु साकांक्षं यागमिति विशेष्यते तदापि सर्वयागानां तथात्वेनाव्यावर्तकत्वेनेति भावः ननु
संनिहितयागमिति सन्निधानरूपपुष्करणस्य विशेषकत्वस्यात्रत्राह सन्निधेश्चेति अधिकृतेति अधिकारिमा
त्रेत्यर्थः संनिधेः स्वयमविशेषणत्वेपि तद्द्वारेण प्रतिक्षेपः संकोचमाशंक्य दूषयति न चेति संनिपत्योपकारि
णां यागस्वरूपार्थत्वस्य प्रत्यक्षत्वेन यागार्थत्वस्यावरणकत्वादन्येषामप्यंगत्वसामान्यात्तदेवोचितमित्या
हः किंचेति नन्वनुवादकत्वेन कान्वितस्योपपत्तेः पूर्वमेव सन्निहितपश्वावसायात्प्रकृतिविरोध इति कथं सर्वार्थ
त्वमत आह यद्यपीति यारिप्लवः साधारणः धर्मविधिरियन्नत्वंगः उक्तन्यायेनायातत्वाद्विशेषबोधे पिवाहीक
वाक्यन्यायेन सर्वार्थत्वं ता तात्पर्यग्रह इत्याशयः प्रधानेति इदमनेनांपकुर्यादिति अंशभावनायाः एव वि
ध्यानार्हत्वादाकांक्षावशेनैकवाक्यताकल्पनेत्यर्थः अंशयोः करणेतिकर्तव्ययोः भावनाचयपक्षे च ताद
र्थ्यं नावकल्पत इत्युक्तं दोषं परिहरति भावनेति यागभावना यागकर्मकभावना यद्वा तं व्रीह्यादिवदन्ये
षामपि यागार्थत्वं वेति तं परिहरति व्रीह्यादीति तद्व्यापार एव फलानुकूलव्यापार एव तथा च स्वरूपसं
पादनार्थत्वेपि तस्य फलभावनारूपयागव्रीह्यादिग्राहकत्वमित्यर्थः तत्रैव स्वरूपसंपादन एव वाहीकादि
वदनुमानं तु न धर्मे प्रमाणमित्याह नचेति प्रतिदेशस्वरूपं दर्शयितुं भाष्योदाहृतं श्लोकमुदाहरति तथा

चेति·ननुप्राकृताकर्मणांतत्समानेषुकर्मसुधर्मविधायकोतिदेशइतिनक्षणांवाचनिकातिदेशव्याप
कं·तस्यसादृश्यनिमित्तकत्वाभावादेवंपशुप्रसादिष्वनन्वयादसंगतंचेयतच्चाह·अपमिति·तथाचतत्समानेष्व
तिप्राप्तिकार्यकथनेनतन्तुक्षणांतर्गतंपशुसादिति·चेष्टंपोधुमिति·भावः·नामधेयेनमासमग्निहोत्रमि
तिगोरणांसन्मुख्याग्निहोत्रधर्मप्रापकं·पद्यपितद्यत्पक्षेतथापिनवचनमिति·भेदः·चोदनापाविविता
क्यस्यलिंगसादृश्यंपनिर्वपतिमन्त्रवादितेनानुमितेनकल्पितेनवचनेनसौर्यादावाग्नेयादेर्धर्मातिदे
शः·मुख्यानामपूर्वभावनानांभेदेसतियथाधिकारंप्रकरणानुसारेणशेषाणांभावोव्यवस्थाकृतः·
ङ्क्तिप्रमाणाकत्वाच्चेष्टाणामितिसूत्रार्थः॥ ॥समाने॥ ॥इष्वावितिइषुणामिचरन्नपञ्जेतेति
हितइत्यर्थः·इषुसादृश्यादिषुरितियागनाम·विष्टुतिर्गानप्रकाररचना·तांकुशाख्यैःकीलैर्वालसि
इष्वाकारांकरोतीत्यर्थः·इषुमिरेवकर्तव्येत्यन्येसमाहारव्यंसामस्तोत्रसाधनंभवतीत्यर्थः·स्तोत्र
णामिति·तत्संबंधिविष्टुतिसाम्नामित्यर्थःवादोविधिः·तथाचइक्षादौतद्दृष्प्राकृतेश्येनेनसमपत्या
श्येनेतथात्रापीत्यर्थः·एवंभाष्यानुसारिव्याख्यापोपन्नस्य·इहसंनिहितंवाचकत्वस्यागादप्रसि

शा। द्री
३

द्वसाद्दरयार्थंगोकरणान्वरसाद्वार्त्तिकमतमाह॥ पद्वेति चोदकप्राप्तत्वेन वृद्धिस्याद्विष्णुस्यादेरितरद्ववशि
ष्टं रूपेणैन समानं तद्दृष्टमोहितोह्यमाबादिविकारवदितिवाक्यार्थः पूर्वत्रास्वरसं दर्शयति समानमिति एवं च प्राकृ
तसंबंधिविकारमात्रस्यैवातिदेशेन त्वाप्राकृतकार्यकंटकवितोदनादेः भाष्यमतेनु तस्याप्यतिदेश इति वि
शेषोन्तेपः समानमितिवाक्ये उपमानामपतिदिष्टानामधिकारेणानुवादः इषुयागस्य प्रकृतिपूर्वकत्वादितिसू
त्रार्थः॥ ॥पंचसंचरेषु॥ ॥धर्मातिदेशविचारानंतरं धर्मबोधकशास्त्रातिदेशमदपेक्ष्यया बहिरंगविषय
त्वेपि तत इयमनंतरसंगतिः पंचानामिति आग्नेयमष्टाकपालं निर्वपति सौम्यं चरुं सावित्रं द्वादशकपालं सार
स्वतं चरुं पौष्णं चरुं इत्येतेषामिष्यर्थः वारुणीति तत्राप्येतान्येव विधायन्तदिष्यादि श्रुतमित्यर्थः पद्घासस्था
नीतराणीति शेषवाक्ये पघ्रासस्थानीतीराशि वैश्वदेविकानि तद्वासरणान्येवैतानि वारुणप्राघासिकानी
र्थः तन्मात्रस्येति प्रधानविधेः प्रमश्रुतत्वाद्श्रुतमपेक्षितमर्थवादमात्रं ब्राह्मणपदेनोच्यत इति भावः
अपेक्षितरूपेणान्वयं दर्शयति प्रशंसेति अर्थवादवदेकवाक्यतयाविधायकत्वमप्यंगवाक्येषु नु त्वामिमा
ह किंचेति समग्राणां परिपूर्णेति कर्तव्यतानां अनेनैकवाक्यतामूलं साकांक्षत्वमुक्तं पंचसंख्यानि संच
रंतिपर्वस्वितितानिहवींषि तेष्विति सूत्रार्थः॥ ॥एककपाल॥ ॥उत्तरेति उत्तरस्यैककपालानां॥ ॥अन्य

राम
३

मिति॰ एगमीमप्यः स्रुच इत्यादिरूपापि समर्थः॰ विकल्पनेन पर्वव द्धहृविषपत्न नाप्यसाम्यप्रसवस्यानपि
तिसंगतिः सूचिता॰ सूत्रार्थस्तुः एककपालानां वैश्वदेविक एककपालः प्रकृतिः आग्रयणेसर्व होमस्याप
र्वव नेश्वदेर्शनात अनुवादाद्वमर्थे चेसकृत्त्रैव द्धवदानवचनाद्न्यत्र सकृदेवावदानमिति प्रतीतेस्त
स्यैव लिंगदर्शनादिति॥ ॥इति श्रीमत्पदवाक्यप्रमाणाहतसत्डामचंद्रानन्दतवैद्यनाथकृतायां शास्त्रदीपि
काव्याख्यायां प्रभाख्यायां सप्तमाध्यायस्य प्रथमः पादः॥ ॥साम॥ ॥संगतिदर्शयति॰ कवतीष्विति॰ कयानश्चि
त्र इत्याद्यास्विष्वः कराद्ववत्त्वाकवयसत्ता स्वामानतोवामदेव्यसामास्ति न बाधेन द्वादशाहे रथंतरं अभि त्वा शूर
इत्याद्यचुसन्नूंसामाति दिश्यते तदर्थं तपास्य संगतिरिसमर्थः॰ गीतिषु सामाख्येति द्वितीयाध्यायगतेन पौनत
क्त्यं काममपाकरोति॰ द्वितीये त्विति॰ नवीति॰ प्रयोजनाभावाद्धितियानः॰ पूर्वपक्षमाहः तत्रेति॰ रथंतरमधीयेति प्र
ति तस्य गीतिमन्त्रं त्राध्यपनेपदृत्तेर्विशिष्टवाचितेस्मर्थः आकृमाधिकरणन्यायेन सिद्धांतमाहः विशिष्टेति॰ अ
त्र पूर्वपक्षोक्तविकसंगतिदेशास्पमवात्कवतीपदेन लक्षितेऽर्थप्रकाशनरूपे कार्येऽभावतीनामतिदेशः॰ अथवा
कवतीषु रथंतरं तल्लक्षितसंभानानादिधर्मकुर्यादिति तद्धन्यरथंतरपदेन लक्षणेति प्रयोजनं॰ सिद्धांते तु गीतिमा
त्रातिदेशइतिस्पष्टमेव॰ प्रयोजनदर्शनार्थमेव वाकृत्यधिकरणार्थस्य पुनः कथनमिति ज्ञेयं॥ ॥इति श्रीम

शा॰दी॰
४

५

न्तस्य द्रामचंद्रसूरिविरचिततत्तस्य हैघनाथकृतायां शास्त्रदीपिकाव्याख्यायां प्रभाख्यायां सप्तमाध्यायस्य द्विती
यः पादः॥ ॥उक्तं क्रियाभिधानं॥ ॥इदानीमः अतिस्फुटतया प्रथममुपक्षिप्तो वचनातिदेशो निरूपितः नामा
तिदेशस्तु गौणत्वान्निर्जितिप्रत्तो न स्फुट इयतस्तु दृत्रं प्रत्यक्षत्वसाम्यात् खानुमानिकात्याद्रिनष्यंत इति भावः उभयोः
नैयमिकयासाग्निहोत्रयोः नियामकोतरमाह अर्थवर्मकश्चेति कुंडपायिनःसामयस्तु संबंधी सत्रो तर्गतो होम
इत्यर्थः नैयमिक इमपि पुंलिंगनिर्देशो होमाभिप्रायः अग्निहोत्रपदं क्रियापाभिधानं नामैतस्मात्तत्प्रख्या
धिकरणोतस्यान्यत्रश्रुतौ विधिप्रदेशोतिदेशः सा द्वितीयस्यार्थः॥ ॥अपि वा॥ ॥नाम्नोतिदेशकत्वस्याप
वादासंगतिः वैश्वानरदेवताकत्वान्नामान्योतिदेशोयस्तु ऊर्ध्ववानः अनेन द्वादशाहिकधर्म विरोधे नवा
धितानांस्योतिदेशो मधर्माणां प्रतिप्रसवः क्रियते प्राप्यस्य नेति प्रपंति प्रारंभं ते नेति करणो वा कुलकादेनाय
रप्रसवः प्रापणो प्रारंभे भवः इति छप्रसयो वा बोध्यः यत्र तु चतुर्थ्यादौ प्रापणीयपदप्रयोगस्तत्र योगा
संभवात् गौणातिदेशकत्वमेवैतत्कृतं तत्र दर्शितं सूत्रार्थस्तु अपि वेति पूर्वपक्षव्यावृत्तिः गुणार्थो प्रा
प्यस्य गुणानिमित्तेति॥ ॥किंश्चातिति॥ ॥संगतिं स्वयमेव ग्रंथकृद् दर्शयति षाडहिकानामिति षड राम ४
हसाध्ययागसंबंधिनामित्यर्थः अत्र दश्येतराद्विराशात्तत्साधनकत्वात्र यदा पदशब्दस्य त्तोत्र वचनवा

तः सामपरत्वेन लक्षणापत्तेस्तदंगीकारे च माहेन्द्रादिषु चतुर्षु पृष्ठैः स्तुवत इत्यादिप्रयोगावगतनिरूढलक्षणांगी
कारस्यैव पृष्ठत्वेनानुवादत्वपक्षनिराकरणानुपपत्तेः एवं च विश्वजित्प्रकरणे रथंतरं पवमाने कुर्यादित्यादिवाक्ये
षु रथंतरादिशब्दाः स्तोत्रलक्षणापातच्छ्ववस्थापरा एवेति पृष्ठशब्दस्य न लक्षणापास्त्व सास नरथंतरादिपरत्वं तत्र
रत्नो क्रमपृक्ताभितिवद्गतिः द्वितीयपक्षमाह ः चोदकेनेतिः रथंतरं पृष्ठं भवति बृहद्वा पृष्ठं भवतीति वाचनिकेन
विकल्पेनेम पूर्थः नचोक्तवचनेनैकस्मिन्नेव पृष्ठस्तोत्रे रथंतरबृहत्साम्नद्वयविकल्पविधिरिति पृष्ठद्वये
मानाभाव इति शंक्यं ः रथंतरं पृष्ठं भवति बृहत्पृष्ठं भवतीति वाक्यद्वयेपि गुणाम्नानाद्व्यतिरिक्तगुणाव रुद्धे चोम १२
त्रिशिष्टस्यानिवेशेन गुणादेव भेदसिद्धेः बृहद्रथंतरयोः तत्संधिनकपृष्ठयोः कथमसमानाधिकरणोतिः तथा चै
तस्मादरूपादुपस्थितः प्रसंगादुक्तोइति भावः अत्र च विश्वजितिदनुवादेन समासगम्य सर्वत्वविशिष्टपृष्ठरूपैकार्थ
विधिः प्रथममध्ये इतिवादितिनवाक्यभेद इतिवार्त्तिकानुसारिणः पृष्ठपदसमभिव्याहाराद्धक्तनतस्मृत
सर्वतामात्रविधाव पृष्ठप्राप्तिरितिभाष्यानुसारिणः ।स्त्रत्वं त्वनुवादपक्षप्रतिपादकः द्रसमभिव्याहाय्र
तस्सर्वकत्वात ज्योतिष्टोमप्रकृतिकत्वात ज्योतिष्टोमिकानि पृष्ठानि सर्वपृष्ठवाक्येन घ्यंते पुनतो माहेन्द्रादिषु प
ष्ठशब्दोस्तीति न सर्वशब्दानुपपत्तिरिति पोयं ॥ ॥तथा वमधः॥ ॥प्रासंगिकसमाप्तौ बुद्धिस्त्तत्स्सर्वा

शा·दी·
५

धिकरणास्यातिदेशासंगतिः वारुणाद्यामिक्षाः ग्रपाम्रिति एषवैदर्शपूर्णमासयोरवभृथ इतिप्र
योगादिसमर्थः तत्रापि कर्मान्तरवादिनोपिपतइतिशेषः एतेचत्नाघनानुषनिष्कासमात्रविधिरेवप्र
कृइतिभातः नचवाक्यभेदः चरादिनसमुच्चितस्यैकस्यैवविधानादित्याशयः प्रमाणामन्ताति सांप्र
ताधिकरणपेनप्रयोगरूपमितिमर्थः मन्यतेनुमदन्तीयाहः पंतीति ग्रग्निहोत्रमितिवदार्थिकसाध्यम
मिप्रापोदितीयांतोवभृथशब्दः कर्मनामेत्यर्थः ग्रवभृथशब्दः सोमासोमिकादवभृथान्तर्यातिदेश
कइतिसूत्रार्थः॥ ॥इत्यादेशो॥ ॥उक्तस्यातिदेशस्यकिंचिदेशोऽपवादात्संगतिः पूर्वपक्षमाहतत्रेति
प्राकृतेतिकर्तव्यताविशिष्टप्रधानकर्मवाचिनावभृथपदेनकर्मविधौपदान्तरोपात्तस्यतुषादेःव्यां
तरस्यनिवेशायोगात्रिवेशेवातावयपीनेकत्वमितित्रवाक्यभेदापत्तेरश्चप्रतिपत्त्यर्थमर्थप्राप्तस्य
पानेसादिस्यानुवादमात्रेनिष्कासेनतुषैश्चरेतदित्याशयः शेषंस्पष्टम्॥ ॥गुणविधिस्तु॥ ॥प्र
संगःसंगतिः ग्राश्ववालेति ग्राश्ववालः प्रस्तरः ऐक्षवौविधृतीयाद्यत्रइत्यर्थः ग्राश्ववालः काशमय राम
ऐक्षव्यौ काशमननमयेविधृतिशब्देनात्रतायावेषांप्रस्तरस्याधस्तिर्यक्निधेयतृणादिरूपमुच्यतेग्र ५

ग्निहोत्रन्यायेनेति· प्रायणीयन्यायस्त्विह नास्ति· प्रायणीयपदस्य यागादिप्राप्तप्रायेण्यानुवादकत्वेनानति-
देशकत्वात· वैष्णवशब्दस्य तु विधायकत्वावश्यंभावेनाधिकार्थनिरूपातिदेशकत्वौचित्यात· यद्यप्यत्राग्नि-
होत्रपदवत्कर्मसामान्याधिकरण्यं नास्ति· तथापि द्रव्यसादृश्यप्रतिपादनद्वारा त्रिकपालद्रव्यको यागो वैष्ण-
वन्नवकपालद्रव्यकयागवत्कार्य इति पर्यवसानादतिदेशकत्वमिति भावः· न गोणेति· वैद्धूर्थं विधिनिरूपा
गौणत्वागीकार्ये इति प्रसंगादिति भावः· सूत्रे समत्वादुभयत्रापि वैष्णवशब्दस्य योगशक्तिसाम्यादित्यर्थः· शेषं
स्पष्टं॥ ॥निर्मथ्य॥ ॥आतिदेशिकी संगतिः· निर्मथ्येनेति चयनेऽश्रुतं· इतरस्य शो· निर्मथ्यो मथनप्रभवो-
ऽग्निः एतस्यावटः निधानार्थो गर्तः· पाशुकस्य· पशावनुष्ठीयमानस्य· धर्मोऽग्निमंथनशकलनिधाना-
दयः· बर्हिर्धर्मो लवनादयः· आज्यधर्मो उत्पवनादयः· विशेषाशंकामाह वैष्णवेति· मंथनादीत्यादिपदेन
लवनोत्पवनादिसंग्रहः· ततोऽपेक्षाप्राप्तकार्यकारित्वान्न प्राकृतधर्माणामतिदेशः· प्राप्तिप्युक्तं· इह तु ब-
र्हिःशब्दस्यातिदेशकत्वनिराकरणमिति दृ· मे॥ ॥सौमिकं तु॥ ॥आतिदेशिक्येव संगतिः· सोमप्रिति-
तिः· उत्तरवेदिप्रतिषेधश्रुतत्वात· प्राकृतवानामत्वात· परिसंख्यापर्यंश्रवणांगुणार्थमपिवादो वेति
चरिता· सौमिकचिमयाग्रपिमेवं चतुर्भिराद्यमधिकरणं· द्वितीयं तु· प्रथमोत्तमयोरित्यादिभिस्त्रिभिः

शा·दी·
६

6

तत्राद्यं वस्पतश्च· मध्यमयोर्नाग मर्थवादात्· औत्तरवेदिको नारभ्यवाद प्रतिषेध इति द्वयं· प्राप्तस्तस्य चा
तुर्मास्यप्रकृतित्वात् दर्शपूर्णमासगतस्य अग्नेः प्राकृदेशे नयनं मुख्यार्थस्तस्य प्राप्तत्वान्न अनारा पासं
मारादिधर्मवतिसोमिके प्रणापनेवर्त्तत इत्यर्थः नामधेय इति· धर्मविशेषविशिष्टस्यवाचक इत्यर्थः ति
ङ· तस्य नामत्वाप्रसक्तेः अनुवाद इति च अनुपुनर्वाद इति विध्यनुवादसाधारणो व्याख्येयं· अन्यथा परिसं
ख्यार्थो नेष्यते रग्रंथ्यासंगतेः गुणो ति· उत्तरत्वे घाम ग्ने निदधातीति संनिधिश्रुतो त्तरवेदिरूप गुणोस्यार्थः
त्रिदोषत्वादित्युपलक्षणं· पर्वीतरेणस्य भावे नयागानुपपत्तेरित्यपि ज्ञेयं· केचित्तु प्रणापनमेव· नांगं तद
भितिपरिसंख्यापामभिप्रायः न च तुष्टिति प्रदर्शनमात्रपरमित्याहुः· तस्मात् तद्धाभ्यामेती मर्थवादार्थ
इति योजना· तदर्थता च प्रणापने यस्मात् द्वयोरस्ति तस्मात्तत्राभ्यां गमनंयज्ञसमापने भवतीति वो हकत
ये ति भावः· गुणार्थताकुतो नेत्यत्राह गुणाश्रवणादिति· स्तवकेष्यश्रवणादिति भावः॥ ॥प्रथमोत्त
मयोः॥ ॥ननु द्वयोरिप्यस्यार्थवादार्थत्वेन सर्वत्र प्रणापनसत्वात् प्रथमोत्तमयोरित्यनुपपन्नमित्या
शंकायामाह· तत्रैवेति· नात्र प्रणापनं कृतरयो द्वयोः कार्यमितिचिंत्यते किंतु तत्रैव प्राकृतं पुनःश्र

राम
६

वर्णां इदं चिंत्यते कतरयोर्द्वयोरिदं प्रणयने तत्कृ वराणामित्यर्थः द्वितीयपक्षमाहुः न वैश्वदेवेन इति नोपवपंति
त कुर्वंतीत्यर्थः अयमाशयः चातुर्मास्येषु उत्तरवेद्यामग्निं निदधातीति वाक्येन प्रकृतप्रणयनानुवादेनोत्तर
वेदिर्विधीयते सा च द्वयोरिति विशिष्य पुनः अयमाशयस्तत्र प्रणयनं गमितमिति प्रतिषेधोपि तद्विषय एव प्राप्तिसा
पेक्षत्वात् रसं च प्रथमोत्तमयोरिति तयोरेव प्रणयनं पुनः अवणीतह गं चोत्तरवेदिस्तस्याश्चाविहितप्रतिषिद्ध
त्वाद्विकल्प इति । ऊरुसंस्तवादिति ऊरू वा एतौ यज्ञस्य यद्वरुणप्रघासश्च साकमेधश्चेत्यूरुत्वेन स्तुतौ इत्यर्थः
पद्वक्रमर्थवादस्य प्रयोजनं तत्स्थाम इति तदेतद्वैयाहः इदमिति । न त्वर्थवादवशेन प्रणयनं पुनः अव
णस्य मध्यमविषयत्वव्यवस्थापापि पुनः अवणस्य किंविषयोऽनमिति शंकते भवविति अस्मिन
हीति । अतिदेशापेक्षयापाशी ग्रोपस्थित इत्यर्थः अन्यथेति आतिदेशिकोपस्थिते चातुर्मास्येषु उपवपंति
उत्तरवेदिं कुर्वतीत्यर्थः प्रतिप्रतिषेधशब्दः पर्युदासपरः अन्यथा विकल्पापत्तेः वाक्यांतरेणेति तथा चै
कवाक्यत्वाभावेनैतद्वाक्ययोः पात्रप्रणयनमात्रे विनियोगासंभवा संनिधानाच्च प्रकरणस्य प्राबल्याच्च तदर्थप्या
ग्निनिधानांगत्वे स्यादित्यर्थः एवं मध्यमयोरुत्तरवेद्युपसंहारस्यान्यथापि सिद्धेर्न प्रयोजनत्वमित्याहुः आपि चेति प्रा
भाकरोक्तं दूषयितुमाहुः पक्षेति प्रकृतितुल्यं अधर्मकत्वेन प्राकृतप्रणयनसदृशं तथा चाविधेये वाक्यतया

र्थवादत्वोपपत्तिः तुल्यमेवेति। अतिदेशादेव तादृशप्रमापननाभावादित्यर्थः। अत्र प्राभाकरैः हन्त नवैश्वदेवइ
मस्य प्रतिषेधत्वे पर्वद्वये वैकल्पिकीप्रवृत्तिरेव नियोगतरवे ह्यितपात्रवपंतीति विधिनाबोधनीयेति वैरूप्यापत्ति
पर्युदासत्वे च सामान्यतोवगतस्य पर्वद्वयप्रसंबंधस्य बाधापत्तिः एवं च नित्यानुवादत्वापत्तिरिति न व्यव
स्थापकः किंतु द्वयोः प्रमापयतीष्येतेवौ देवोत्तरवे ह्युपसंहारकमिति नानर्थकमिति तन्निराकरोति पविति
एवं रीत्या प्रतिषेधपर्युदासद्वयशोऽनतौ प्रशोकरोति नार्थं प्रहरणीतइत्याह वर्णितयोः संभवापत्तेः। आ घेः
ति देशस्यान्यांगतिबपत्त्वं निष्पत्त्या आद्यभागविषयत्वमाश्रित्य तयेति वैरूप्यसाम्यात्। द्वितीयेत्यार्थप
…नासंकोचापत्तेस्तुल्यत्वादितिभावः। प्रकृतमनुसंधत्ते पदि चेति। कथंचित अर्थवादद्वारेणास्य मप्ये
…एव प्रमापने ज्ञातिरूपमुपस्थितम् एवोत्तरवेदिविनियोगइत्युक्तप्रकारेण। अपम्यामनंतरमुपत्ति
…रितिशेषः। तत्प्रयोजनेति। नवैश्वदेवइतिवाक्यस्यानारभ्यविहितोत्तरवेदिपर्युदासरूपप्रयोजन
…नार्थमित्यर्थः। मध्यमयोः प्रमापने सतितत्रैवोत्तरवेदिप्राप्तेः प्रथमोत्तमयोस्तत्प्रसक्त्यभावाद
…प्याशंकापातद… तः। आनर्थक्यतदनुपपत्तेरित्यर्थः। तथा चेति। मध्यमे प्रमापने सतितद
…देः प्राप्त्या पा… त्तेबोधइत्यर्थः। व्याघातइति। विकल्पांगीकारेतु सत एव दोषइतिभावः। एवं

...एवं व्याख्येयः मध्यमाकृत्वनताभ्यांगमनेसंभवति किंतु पादकृपाभ्यां प्रथमोत्तमाभ्यामे
...पः द्वौ अधिपु प्रतिपत्स्यातारौ । प्राकृतपुराणपनोत्तरकालभिमनेन प्राकृतस्यगार्हपत्यदानेपक्षा
...हवनीयादानेपत्न्यान्न प्राकृतवाधइतिकथितं । यथाक्रमेणेति । प्रथमपक्षप्रयोजनकथनार्थः पारि
...र्थश्रवणांगुणार्थमर्थवादो वेति सूत्रे । द्वितीयपक्षस्यप्रयोजनकथनार्थं प्रथमयोरिमादिसूत्रे सिद्धां
...प्रयोजनकथनार्थं मध्यमयोर्वांगस्यभावो वादिति सूत्रमित्यर्थः । ननु प्रथमोत्तमयोः पुराणनिमित्तस्य प
...सूत्रस्याभावे तत्परिहारार्थमोत्तरवेदिकोनारभ्यवादप्रतिषेधइति सूत्रमनर्थकमित्याशंक्याह । उत्त
रेति । सोमिकं पुराणनिमित्तिपक्षसाधकस्योत्तरवेदिप्रतिषेधश्रवतद्विदिमस्यापंपरिहारइति भावः । अवांत
रप्रकरणाद्वरुणप्रघासमात्रविषयत्वात्कथमुपात्रेत्यसामान्यविषयत्वमतआह । सामान्येति । वरुण
प्रघासमात्रविषयत्वे न वैश्वदेवइतिनित्यानुवादः स्यात् प्रसक्त्यभावात् एवं चानुवादेत्रपारणामपिकी
र्तनंस्यात्तद्वयोरेव । आनर्थक्यं च नित्यानुवादे स्यात् । अपि चात्र वाक्यभेदपरिहारायपर्युदासो वाच्यः स
र्वोपात्रे चैत्स्य वरुणप्रघासमात्रविषयत्वे नोपपद्यते । वरुणप्रघासेषूत्तरवेदिं कुर्यात् वैश्वदेवे यत्र तासीरी
पवर्जमित्यपोगात् । किं तु चातुर्मास्येषु उत्तरवेदिं कुर्यात् द्वैश्वदेवे वशुनासीरीयवर्जमिति तेनावांतरप्रकर

रास्यपर्यवसानुसारेणावास इति भावः ॥ ॥स्वरसामैकः॥ ॥नामातिदेशापवादप्रसंगात्संगतिः स्वरसा
मान इत्यनंतरं विहिता इति शेषः तद्विधायकमुक्थ्याद्यसादि इ उक्थ्यसंस्थाः सप्तदशस्तोमकाः स्वराख्यसा
मपृक्तापागविशेषाः कार्या इत्यर्थः अन्यत्रापि अपूर्वाद्यावित्यर्थः अन्यत्रापीति अनूवंध्यास्थाने मैत्रा
वरुणापामिक्षा अवभृथे च वारुणएककपाल इत्यर्थः नामातिदेशाभावेपि प्रानुमानिकचोदना
लिंगातिदेशोत्तीत्याह अन्यचेति निगमस्य प्रापकप्रमाणाभावेपि वाह स्वरसामत्वेति स्वर
सामत्वादिनाचोदनाशापः राद्धेः स्वरसामैककपालामिक्षादिरूपः प्रकृतिमादरूपरूपश्चोद
नालिंगाख्यस्तदनुगृहीतेभ्य इत्यर्थः लिंगानि चेति पथ्यः षडहो दोहस्वरसामानालिमकाख्या
षडहेपन्तीपं सप्तदशाम्नहलन्दे मस्य त्रयस्त्रिंशस्तोमकस्य स्थाने पिपर्याहरति त्रपारांशम
दशानामयनचीनतापे इति श्रुतं तत्र द्वयोः स्वरसाम्नोः सप्तदशस्तोमकत्वेसति त्रयाणां
सप्तदशानामयनचीनत्वेनैरतपर्यूपं भवतीति गावामयनिकसप्तदशस्तोमकं स्वरसामातिदेशे लिंगमुक्तं यथा एक
कपालानां वैश्वदेविकविकारत्वे आग्रयणागतेककपाले यस्य वर्द्धते करोति साक्षे कापरि चक्षाः पद्रुतो हतः
पर्यावर्त्तते सा द्वितीयेति वैश्वदेविकैककपालधर्मस्य सर्वहोमस्यापर्या हृते श्वनिहाया: प्रस्यैव घातायाः

वयोपत्रेतेति वैकल्पिकास्य विधिशेषभूता । वैश्वदेविकैककपालेन हि सर्वं हुतं तु होति । अपर्यावर्त्तं तु होतानिति विहितं । यथा
न पर्यावर्त्तते अग्नौ हुतो नो त्रानी भवतीत्यर्थः । तत्र सर्वहोमस्य परिचक्षालिंगात् स्विष्टकृदादिलोपात् । पर्यावर्त्तने दोषाद् प
रा । तस्माद्धमस्मै व प्रशस्तमित्यर्थवादार्थः । एवं मैत्रावरुणापामामिक्षापानवाजिने न प्रचरंतीति निषेधो वैश्वदेविकामिक्षा
गवाजिन प्रसक्तिपूर्वकत्वान्नद्वतिदेशोल्लिंगमिति भाष्ये दृष्टव्यमित्यर्थः ॥ ॥ कर्मत्रे ॥ ॥ प्रसंगसंगतिप्रदर्शनायाह क
र्मत्वादिः पूर्वादीनां । पूर्वादिराकानां । रवलेवानीपूयो भवतीमाद्रा विमत्यर्थः । अधिकरणांगसंशयमुक्त्वा फलीभूतं सं
शयमाह । कियानमिति । त्रिपापमेवेत्येव कारो विधत्त एवेति पोऽस्य ॥ ॥ विशये ॥ ॥ प्रसंगः संगतिः । गर्गत्रिरात्रे आसदे
हारव्यानि सामानि प्रकृत्याग्निमित्या घाम्नाते । संस्कृतस्येति । संस्कृताश्याहवनीयादपः सकलवैदिककर्मार्थाः । पद्वा
हवनीये तु होतीमाहवनीयप्यवस्थार्थमित्याशयः । नसंस्कृतमिति । विशेषवचनं विना आपतनाच्चाग्नने दोषा
पत्तेरिति भावः ॥ ॥ संस्कृतं स्यात ॥ ॥ पूपशब्दस्यातिदेशकत्वं क्वचिद्योधत इति संगतिः । पूपैका द्रशिन्यां पूपस
मापेकाष्टनिधानं विधायोपशय इति श्रुतं । संस्कारवाचि पूपशब्दस्य कथमनुवादतयाविप्रयोगस्तत्राह । पूप
धर्माइति ॥ ॥ कर्मशास्त्र ॥ ॥ अनुवादतया पूपशब्दस्यानतिदेशकत्वेऽप्यत्र विधिगतत्वान्न स्यादिति पूर्वपक्षोत्था
ना संगतिः । यौति षौमि केति । एष शब्दस्यतस्स्व दृशापरत्वेन पष्ठ बहुत्वानपेक्षणात् सर्वप्रकृतिभूतसोमातिसोम

रा·दी·
९

गतपृष्ठसादृश्यविधिरेव युक्त इति भावः यद्यपि पृष्ठधर्मकाणां करणत्वेनैव विधिः अत एवाग्रे वक्ष्यति पृष्ठस
दृशैः कर्मभिरिति तथापि पृष्ठसादृश्यस्य साध्यताबोधनाय द्वितीयांतनिर्देश इति ज्ञेयं ननु तादृशकर्मापरिज्ञानात्कथं
तेषां विधिरत आह तानीति रथंतरादिषु तदाश्रयमंत्रेषु रथंतरादिगीतिभिरभिधानायोगात् ननु प्रसिद्धपृष्ठशब्दा
भिधेयस्तुतिविधानमेवास्त्वित्याशंक्य प्रकरणांतरन्यायेन कर्मांतरविधिरित्याह अपूर्वमिति उपतिष्ठतेस्तु हि कथ
मन्त्रपरत्वं तत्राह उपतिष्ठतिधातुरिति ननु गौणापेक्षयाभिधानलक्षणैव युक्तेत्याशंक्याह पदैरिति एवं च लक्षणा
द्वयापेक्षया गौण्यैव युक्तेत्यर्थः तद्यन्येति पूर्वपक्षे धर्मलक्षणा सिद्धांते तु मंत्रलक्षणेति तुल्यमित्यर्थः ननु तव
धातोरप्यभिधानेऽधिका लक्षणोक्ता तत्राह नवेत्यपीति समीपस्थिते मंत्रे करणकत्वानुपपत्तिमाशंक्याह
सान्निध्यमिति कथमभिधानार्थतानिश्चयस्तत्राह मंत्रेति आत्मनेपदबलादभिधानप्रयोजनत्वनिश्चय इत्यर्थः ए
वमपि कथं समीपस्थिते मंत्रस्य करणत्वं तदुपपादयति प्रधानाधीनं हीति न हि अंगानुष्ठानमंगिस्वरू
पमात्रनिष्पादनार्थमपि तु प्रधानमंगिनः प्रयोजनं यत्तदधीनमपि भवतीति यथा यागफलयोग्यताजनकदीक्ष राम
णीयादेर्यागांगत्वमेवं समीपस्थितिफलमभिधानं कुर्वतो मंत्रस्य तां प्रत्यंगत्वमित्यर्थः ननु कथमप्यश्रुतस्या ९
भिधानस्य विधिरित्याशंक्याह तदुपमिति द्रव्यदेवतासंबंधानुमितयागवदित्याह तस्याभिधानस्य विधान

मितिभावः अत्र त्वामिद्धि अभिप्रेत्येति संबोध्यार्थकपृष्ठशब्दवत्तां मंत्राणां समीपस्थितिं विनानुपपत्तेरर्थं तत्तद
नुवाद इति तौ ध्येयं ॥ कर्मणोपूर्वस्मृते र्वाचकः पृष्ठशब्दः स्यात्तथाभूतस्यैव तस्य वाचकस्यात्रोपदेशादिति सूत्रार्थः ॥
॥ इति श्रीमत्समस्तमचेन्द्रमहत्वैद्यनाथकृतायां शास्त्रदीपिकाटीकायां प्रभाख्यायां सप्तमाध्यायस्य तृतीयः पा
दः ॥ ॥ इति कर्तव्यता ॥ ॥ अवसरसंगतिं सूचयन्नाह इदानीमिति कारिष्यमाणविचारोपयोगितया विचारांतरं
दर्शयति प्रथमं तावदिति निबद्धत्वादिति तत्र प्रकरणाव्यवस्थितत्वादित्यर्थः ननु दर्शपूर्णमासयोरपि यदिति
कर्तव्यतेति विशिष्य न विधीयते किंतु यागसामान्यस्यैवाशंक्याह नचेति प्रकरणेन दर्शपूर्णमासापूर्वार्थत्वस्यै
व व्यवस्थितत्वादित्यर्थः ननु शास्त्रस्याव्यवस्थितत्वेप्याकांक्षावशादिति कर्तव्यतायां अन्यत्राप्यन्वयः स्यादत
आह नचेति आकांक्षा हि प्रमाणसहकारिणी न स्वयं प्रमाणमिति भावः ननु लौकिकस्य पिण्डपितृयज्ञस्य त्वादिनिब
द्धा तत्र सकर्मत्वे वस्यादित्याशंक्याह लौकिकीविति पार्वणः पर्वणि क्रियमाणः स्थालीपाकः गृह्यादेः
स्मृतित्वेन श्रुतिमूलत्वादनेककर्मोपदर्शनेन नानाप्रकृतिकल्पने गौरवादेकैव सर्वसाधारणी कल्प्य
त इति सौर्यादिष्वपि तत्प्राप्तिरित्यर्थः नन्वेवं सति सौर्यचरौ प्रयाजे प्रयाजे कृष्णलं जुहोतीति प्रयाजादिद
र्शनानुपपत्तिरत आह प्रयाजादीति आपि वान्यायपूर्वत्वाद्यत्र नित्यानुवादवचनानि स्युरिति सूत्रं असा

रा॰ दी॰ र्थः लिंगस्यन्यायपूर्वकत्वाच्च दर्शपूर्णमासयोः प्रयाजानूयाजक्रमत्वस्य विधिः प्रतिपद्यते न होतारं वृणीत इति नि
१० षानुवादः गृहमेधीये प्राकृतभागोपयजतीति वचनमपूर्वविधानमिति प्रयाजे प्रयाजत इति प्रयाजानां विशिष्टविधि रि
ति भाष्ये। लौकिक्याऽपि स्मार्तत्वेन श्रुतिमूलकत्वाद्वैदिकत्वं तु न्यायमित्याशंक्य प्रत्यक्षवेदविहितत्वाभावान्न
10 समानत्वमिति परिहरति यद्यपीति। स्मृत्यनुमिताद्वेदादवगतो लौकिकोपि कर्मभावो वैदिककल्प एवेत्यर्थः तथा
पि। प्रत्यक्षवेदविहितत्वेपि। वैतानिकेति। वितानो गार्हपत्याद्यग्नीनां विस्तारस्तत्र भवानि कर्माणि वैतानिका
नि तदधिकारे तन्निरूपण इत्यर्थः त्रयी वेदत्रयं। अवैतानिकं। मलवद्वाससो व्रतकलापादि। एवं च स्वाधिका
रप्रवृत्तत्रयीविहितत्वरूपमवान्तरसादृश्यं पश्चाद्योपलक्षितेतिकर्तव्यतानियामकमित्याह। तेनेति। वैदि
कत्वसाम्येप्यवान्तरवैविध्याद्वान्तरसाम्यस्य नियामकत्वकल्पनायां नित्यप्रामाणिकत्वमाशंक्याह किंचेति। वैता
निकेष्वाहवनीयस्य लौकिकी गृह्योक्ताचारादिति। तेषां तत्तत्स्मृतिवचनलक्षिताचारमूलत्वादिति
भावः। वैदेश्ये भिन्नदेशत्वे समानेति। उपदेशसाधारणापद इत्यर्थः। ननु लौकिकी सर्वसाधारणी। पार्वणा
ष्टकादिवहुककर्मप्रवृत्तत्वात। आचमनादिवदित्यनुमानमाशंक्य निराकरोति न चेति। गृह्योक्तेति। मातृगणा राम
यागादिविधिपर्यन्तः इत्यर्थः भावः। अत एव कर्तोपकारः प्रकारपर्यायः पदार्थानां स्वानं तच्च गाणि देशा इति १०

प्राभाकरमतनिरासाभिप्रायेणाह । सचेति । अतिदिश्यमान इति शेषः । तद्विशिष्टः प्रापक इति । विशि
ष्टविधौ विशेषणविधेरार्थिकत्वादिति भावः । तथाचेष्टं भावनाविशेषणतयोपकारकाणां तद्विशेषणतयात्तप
दार्थानामतिदेशो न स्यात्तं चेत्त । आकांक्षाविरहादिति भावः । ननु विध्यन्तरस्यांगस्यास्त्रातिदेशप्रतिपादकस्सत्त्वावि
शेषश्च स्यादाशंक्याह । तद्विधाइचेति । पदार्थविधायिचेत्यर्थः । अर्थादिति । शास्त्रेण प्रकृतोपदार्थप्राप्तिरिति नातद
तिदेशापेक्षा इत्यर्थः । भाष्यकृता विध्यन्तपदस्याऽस्यासौरोडाशिकं ब्राह्मणं सौर्यादीनां चोदनापं प्रवर्त्तेनेत्यु
क्तत्वाच्छास्त्रातिदेशमभ्युपेत्याह । अस्त्वेति । ननु शास्त्रमात्रातिदेशे तद्विहितानां पदार्थानां प्राकृतप्रयोज
नाभावेपि प्रयोजनान्तरकल्पनास्यादेवं चोदकबाधो न स्यात् । अग्निपदस्य सौर्ये देवताप्रकाशकत्वाभा
वेप्यदृष्टार्थत्वसंभवादेवमवघातस्य कृद्यमनचराविस्मतत्याह । तथापीति । न शास्त्रस्वरूपमात्रातिदेशः
किंतु प्रकृतोपादेशोपकारजनकपदार्थप्रापकत्वेनातिदेशोपकारजनकपदार्थबोधकशास्त्रत्वेन प्रकृ
तिसंबन्धित्वेनावगतरूपस्यैवेति नोक्तानुपपत्तिरित्यर्थः । एवं च सति पूर्वोक्तातिदेशलक्षणमप्युपपद्यत
इति भावः । वाचनिकशास्त्रातिदेशोप्येवमेवेत्याह । यत्रापीति । असंप्रतिपन्नेति । मित्रार्यमादित्यर्थः । देवता
पदेति । देवताप्रकाशकपदेत्यर्थः । अपि चेति गात्सपा । अध्यनेछपां । स्वरूपस्य । अग्नय इमानुपूर्वीरूप

शा॰ दी॰
११

स्य॰ मुख्यत पापकृतमुपसंहरति॰ तस्मादितिसोऽपीदृशावितिकर्त्तव्यतापाश्चविशेषपर्यंततः पूर्वतत्वं प्रक
तिपूर्वकत्वमितिसूत्रार्थः॥ ॥द्वादशाहे॥ ॥अवसरसंगतिंसूचयितुमाह इदानीमिति॰ प्रसक्तवचना
तिदेशप्राबल्यंस्फुटमेवेति न विचारितमिति भावः॰ गणोहर्गणाः अनियमो विकल्पः॰ वचनवत्त्वमुपपा
दयति॰ फलेति॰ प्रयोगवाक्ये प्रजाकामा गवामयनमुपेयुरितिवाक्ये॰ ननु नाम्नोप्यतिदेशकत्वमावश्यकं
अन्यथानर्थक्यादितआह॰ फलसंबंधं त्विति॰ तथा चाविरुद्धधर्मातिदेशकत्वेन नाम्नोऽर्थवत्त्वमिमसर्थः भा
वनास्वभावात॰ अंशत्रयसाकांक्षत्वरूपात॰ समत्वपेति॰ आनुमानिकवचनेन वैदिकेतिकर्त्तव्यतातिदेशो
स्तीतिसत्त्वमात्रेणासामान्यतो निर्णीतमिमसर्थः॰ भविता॰ अष्टमइतिशेषः॰ सूत्रार्थस्तु॰ द्वादशाह्निकं धर्म
जातं द्वादशोपसत्त्वादि अहर्गणगवामयने कुतस्त्य इति त्वादहर्गणत्वसाम्येन द्वादशाह प्रकृतिकम्
त॰ कथं तर्हि मैत्रि नर्मयकं वंत चाह॰ ऐकाह्निकं कर्म ज्योतिष्टोमातश्चाधिकानां धर्माणामपेक्षाह ज्योतिः॰ संत
काहागमनानद्वादशस्यात॰ एकाहवत॰ एकाहकोऽप्यधितज्योतिरादि न दिति॰॥ ॥इति श्रीमपदवाक्य
प्रमाणाभिज्ञतत्सज्ञमभह्यख्यतनृजं वैघनाथकृतायां शास्त्रदीपिकाव्याख्यायां सप्तमोध्यायः॥ ॥ राम
श्रीलक्ष्मीनृसिंहायनमः॥ ॥ ॥ ॥श्रीगणेशायनमः॥ ॥अथपविशेषत्र्यसमा॥ ३ प्रती ११

व्योप ज्जीवक भावसंगतिं दर्शयति· विध्यंतेति· विध्यंतो वा प्रकृतिवच्चोदनायां प्रवर्त्तेत तथा हि लिंगदर्शन
मितिसप्तमोपांत्याधिकरणोऽस्यार्थः सर्वधर्मानिति देशेसप्तके विचारायोगादाह· प्रथमं तावदिति· अस्य विचार
स्य गतार्थत्वमाशंकते नन्विति· विध्यंताधिकरणो· तत्पूर्वपक्षे· मिथो विप्रतिषेधाच्च गुणानोपपत्यार्थ कान्य
नाम्यादिति स्त्रैशेष्यार्थः एके नैवेति· विध्यंतेनेति शेषः एवं निपम उक्ते तद्धेतु प्रतिपादकान्यत्रांबचाराणीत्या सू
त्तादिति· नियामकमित्यर्थः॥ ॥यस्य लिंगं॥ ॥चिकृमिति· साहश्यमित्यर्थः शाब्देति· शब्दघटितमर्थघटितं वेत्य मि
र्थः तत्र निर्वपतिमत्वदेवतार्थकतद्धितवत्वादिशब्दघटिते· एकदेवतत्वाद्यर्थघटितमिति तेपं· आग्नेयचोद
नाशब्देन सर्वांगविशिष्टाग्नेयविधायिप्रयोगविधिर्यः तेन चतुरश्चतुरो मुष्टीन्निर्वपतीति वाक्यस्थ
निर्वपतेस्तत्संबंधोपपत्तिः निर्वापरूपार्थसादृश्यं चेति देशात्राग सिद्धत्वादनाशंक्यम· वाक्यशेषत्वेन·
वाक्यार्थशेषत्वेन· संबध्यत इति· कल्पितवचनेनेति शेषः तद्दर्शय[illegible]तितद्दयामिति· यस्य लिंगमित्ये
तदेव प्रपंचयति· एवं मिमादिना· अग्नीषोमीयैंद्राग्न्यपोर्पर्यायप्रयोगं न तु समुच्चय इति तेपं· अव्यक्तेषु·
तद्धितचतुर्थीमंत्रवर्णैः स्योद्देशेनाविहितदेवताकेषु· संवत्सरादिषु· संवत्सरसत्रादिषु· एवमनेनैवा
धिकरणेन सिद्धत्वमप्येतत्प्रपंचनार्थमन्येवोत्तराधिकरणानि स्फुटप्रतिपत्त्यर्थानीति नव्यार्थानीत्य

शा॰दी॰
१२

ह॰ उत्तरस्त्विति॥ ॥प्रवृत्तत्वात॥ ॥आपवादिकीसंगतिः॰ अग्निहोत्रदर्शपूर्णमासवदेवसोमस्यापि नैरा
कांक्ष्याद्देवातिदेशांशापाञ्चभावान्नत्वैवात्रपाशामपितत्वंकानिराकरणार्थमुदाहरन्ते व्याख्या सोम
मा चोपादानेसूत्रे नुपपन्नमिमाशंक्याह॰ अग्निहोत्रइति॰ विपरिवर्त्ततइत्यनेनतरमितिशाब्द्याख्या हा
रेणाइति हेतुरित्यन्तपः लिंगस्याप्युपस्थापकपातिदेशकत्वादुपस्थितेश्चात्रापि सत्त्वादितिभावः ता
पकरूपलिंगदर्शनमप्याह तस्येति॰ सोमस्यपर्णः इष्टिविकारत्वेसतिप्रयाजाद्यनुवादः संगछतेनान्यथेत्यर्थ
ःसोपमितिः शंकाहेतुरित्यर्थः नानपेक्षइति॰ आकांक्षासत्वेप्युपस्थितिर्नियामिकास्यादितिभावः तस्येति
लिंगदर्शनमुपपादयति॰ प्रयाजेति॰ वातयेपस्पपइति षष्ठीवत्परंपरासंबंधे तस्येतिषष्ठीत्यर्थः अन
घतइत्यनेनयथाप्राप्तस्यानुवादात्परंपरासंबंधाश्रयणान्नदोषइतिध्वनितं॥ ॥इष्टिषु॥ ॥प्रसंगाह
रणासंगतिः॥ ॥पशौच॰ ईषां॰ लांगलानाधारभूतेशकटादेः नन्नूपाकरणादिसन्निपत्यांगाम्नानात्त्रप
शोर्धर्माकांक्षैसा शंक्याह इष्यतेचेति॰ आवाहनासादनादिदृष्टार्थगापेक्षास्तेनेत्यर्थः वस्तुतः क राम
पसंनिधौविहितस्यपशोः प्रदेशांतरान्नातैर्धर्मैर्नैराकांक्ष्याभावाल्लक्षोपकारधर्माकांक्षापेक्षि १२

सर्मातिदेशादिति बोध्यं· एकादशप्रयाजान्यत्वतत्त्वादि लिंगदर्शनादिति सूत्रार्थः॥ ॥दैक्षस्य॥ ॥यो दीक्षितो
यदग्नीषोमीयपशुमालभेतेति दीक्षासंबंधादग्नीषोमीयपशुर्दैक्षपदेनोच्यत इति दर्शयति· दैक्षस्याग्नीषोमी
यस्येति·॥ ॥ऐकादशिनेषु न त्वैकादशिनेषु दैक्षस्यैवातिदेशो न तु सवनीयस्य· न हि विकृतके विकृतकांतरं प्रा
चक इति न्यायादित्याह· सामेति· सामान्यस्य साम्यस्यातिरेक आधिक्यं· समानकालत्वं चैकादशिनानां कृतुपशु
भिः सह विकल्पविधानादेव गंतव्यं· दैक्षस्यान्येति· सवनीये हि त्रिवृतापूर्वं परिवीयेवैकादशिना· द्वितीयायां दैक्षस्य
तो· प्रकृतितः प्राप्तेस्तस्यतिरश्चीनात्वं पंचदशेन त्वाद्यादित्यर्थः॥ ॥तत्र वृत्तिर्गतोषु॥ ॥सौत्रामणापादिष्विति· सौत्राम
णयादिषु ये पशुगणास्तेष्वित्यर्थः· गणात्वेति· पशुगणांतर्गतत्वमित्यर्थः· आधिक्यं च समानकालत्वापेक्षया· असमा
कालेषु तु गणेषु गणत्वसाम्येनातिरेकादाधिकधर्मत्वाभावादित्यर्थो बोध्यः· यत्तत्त्रिपशुपेणालभेत वहिर्धा स्या
दिति पंचवीर्यं देव्याद् एकपशुपालभेतेति त्रिपशुकायां सौत्रामणयां पापाने कत्वप्रतिषेधः प्रसक्तिपूर्वकत्वादै
कादशिनतिकृतिवृत्तापक इति प्रतिपक्षिव्याप्यादिः सौत्रहेत्वर्थः॥ ॥अन्यत्नादू॥ ॥अत्रैकाहेस्विमेव पाठः
एकाहादिष्विति तन्नेस्वकदोषादिति तत्पं· द्विरात्रादेर्वादशाहविकृतित्वेनादिपदग्राह्यत्वासंभवात· आर्थिक
इति· पागदेन तयोः परस्पराकांक्षावशात् कृत्यपागदागृहतासंबंधपर्यवसानमित्यर्थः· नन्वैकादशिनी

विषयं तोगराणत्वसाम्यपदस्यादत आह अव्यक्तत्वमिति॰ तथा चाव्यक्तत्वेसतिगराणत्वेद्धादशा ह एव नान्यत्रेति भावः
फलमाह॰ एवं चेति॥ ॥गव्यस्य च॥ ॥अत्रायन शब्द व त्व साम्यमपि तेपे॰ संवत्सरं निपमेति॰ चतुरं हे पुरस्तात्स
र्ती मासस्य द्वी हे रन्निस्यादि नियमन्ना भावे स्पर्धः पद्यपि गोपय सोर्यदिति गो विकार वाची गव्य शब्दस्तथापि ग
वामयने गा वो वा एतत्सत्रमासत ते स्पर्धा वा दे न गोसं बं धान गमा तन्मा त्रेता स्मत्रे प्र पुत्रः॥ ॥निकाय्येनो॥ ॥नि
काय्यपदार्थमाह॰ सा हस्वा इति॰ साहस्त्रा इत्येकसं त्याता घस्त्रा इत्येकसं तपेत्र च पः॰ तथा च नाम्नः सर्वत्रम
रव्यतयातिदेशक त्वास्य मवः सूचितः॰ एवं सति पर्वस्यो नरे स्मिति स्मि द्धां तास्य म वा दाह पश्चा त्कमे रो ति॰ निका
यः॰ संघस्तेषामत्ती तित पा भूताः एकेति॰ एतत्त्र सा घस्त्रे साहस्त्रातिदेशव्याव स पर्थ॰ एवं चद्धपमपि निरपेक्ष
मेवातिदेशकं॰ लिंगदर्शनमाह॰ पथेति॰ उत्तरस्मिन्निति शेषः पातदस्यसाहस्त्रस्य उत्तराधराणों विसमा
हिताभवति तावदस्मान्नीकादसौ लोकइति स एव दक्षिणाह्रपथ मनु वादः॰ पूर्व वि कृति सप वे त्रान्य
पेस पर्ध॰ पर्वस्मिन न तद्विधानात॰ उत्तराधर भावे न गतो स्य त्व स्य संख्या ना मवस्या ने पातान्तर्ध प्रदेशो
व्याप्यते तावदेवान्तरमस्य एतस्त्रोपमौ गयोग्य देशस्य चेतिस्फूर्तिः॥ ॥कर्मणा॥ ॥फलाद्यति देशा त्म रम
पवादासंगतिः तत्रेति॰ प्रकृतिसं दे वि से द्यंगा दे शनिमित्रं फला दा वपि तन्या सि स्पर्धः॰ उपदेशे १३

न तावदनुष्ठानातिरिक्तं स्मारयति प्रकृत्यैवेति । आकांक्षाभावान्नातिदेश इत्याह नचेति । इष्टंभावान्वय
इष्टंभावेनान्वयः ॥ ॥गुणकामेषु॥ ॥पूर्ववैषम्येणापूर्वक्लृप्तप्रसंगतिं सूचयन्नाह तत्रेति । गोदोहन
स्यानर्थसम्पत्तिदेशः प्रकृतानुपकृष्टो मयार्थदर्शनादेः प्रवृत्तावसंदेहात्फलप्रवृत्तिमाह । तथे
ति । वैगुण्यादिति । चमसांगकृतप्रणयनलोपेन कृतवैगुण्यप्रसंगादित्यर्थः । ननु काम्यनवाधाद
नंगत्वं च मसस्येप्सत आह विनेति । तथा च बाधकप्रमाणाभावाद्वैगुण्यमेवेत्यर्थः । ननु भय
र्थं दधिस्यादिदर्शनादेः फलप्रयुक्तो न वैगुण्यं बाधकमिति यावदाशंक्याभ्युपगमवादेनाह । अवै
गुण्येप्यपीति । वस्तुतः कृत्वर्थत्वेपि दध्यादेर्विकृतौ प्रवृत्तेः फलार्थतापांच कृत्वर्थताभावादभ्युपेत्यवादमात्रेणा
प्यमिति बोध्यं । ननु प्रणयनमात्राच्चमसत्वेन गोदोहनादेः फलसाधनत्वस्य शास्त्रेणावगमाच्चमसबाधे सति बाधित
स्यानेगत्वान्न तल्लोपकृतविकृते वैगुण्यमत आह । किंचेति । प्रकृतत्वात् उपस्थितत्वात् ॥ ॥एककर्मणि॥ ॥गो
दोहनादिवैषम्येणाप्रमवच्छेदनाप्रसंगतिः । उभयप्रसंगः पौर्णमास्यमावास्ययोस्ततः आर्थिकीति । एषा कालकृतावच्छे
दार्थसिद्धान्ततुशास्त्रकृतेत्यर्थः । आर्थिकत्वमेवोपपादयति । चन्तर्हीति । पृथिवीहोतेत्यादिश्च न तर्हि

रा॰ द्वी॰
१४

ता॰ आग्निहोत्रेत्यादिः पंचहोता॰ समुदायेति॰ पौर्णमासीसंज्ञकर्मसमुदायसंबंधिहविः पंचहोत्रेतिरीत्येत्यर्थः
समुदायस्याभिमर्शनस्योक्ततया हविर्निक्षपणात् ननु पौर्णमास्यादिपदस्य कालेमुख्यत्वात्स्य प्रत्यर्थे द्वितीया
मंगीकृत्य तत्काले पडुविरितिकालद्वारेणोपदेशः अथवा पौर्णमासीपदस्यैव तत्कालिकहविर्निक्षपकत्वादि
तीयातु मुख्यार्थैवेति कुतो नेष्यते तथा च वार्त्रघ्नी पौर्णमास्यामिति तद्वाचनिकी व्यवस्थेति नार्थिकत्वमत आ
ह॰ प्रकृतत्वादिति॰ प्रधानसमुदायस्य प्रकृतत्वात्तत्संबंधिहविर्निक्षपणायां हविरंतरे नातिप्रसंगः कालस्यत्व
प्रकृतत्वेन तत्संबंधिहविरंतरेतिप्रसंगवारणाय प्रकृतत्वेन हविर्विशेषणीयमिति न तद्वारोपदेश इति भावः
अत्रवासन्नानि हवींष्यभिमृशतीति विहितमेकमेव कर्म तत्रैकार्थ्यान्मंत्रयोर्विकल्प इति द्रष्टव्य॰ समुदाय
द्वारकव्यवस्थायां चाग्नेयस्य समुदायद्वयांतर्गतत्वान्न व्यवस्थाभागित्वमिति तत्र मंत्रयोर्विकल्प एव स्या
त्॰ अत इति॰ कथं तर्हि प्रकृता वाग्नेये व्यवस्थासिद्धिस्तत्राह तत्त्वेति॰ आग्नेयं॰ हविः॰ तथा च व्यवस्थितहविरंत
रानुसारेणार्थिकी व्यवस्थेति भावः एवं पूर्णमास्यमावास्ययोराग्नेयस्यैकत्वमिति स्वमतेनाव्यवस्थोप
पादिता॰ तद्भेदवादिमते पि सोयं तस्य विकल्पे नोभयविकारतया व्यवस्थासिद्धिरिष्टव्येति॥ ॥ ॥ सूत्रार्थस्तु राम
एककर्मणि सोयं मंत्रविकल्पः प्रियतश्चोदनैकत्वाद व्यवस्थिति॥ ॥लिंग॥ ॥ सोयं स्याग्नेयविकारत्वे सिद्ध १४

द्वि

वद्रूक्रमाक्षिप्य समाधीयत इति संगतिः विशेषेति तद्धितनिर्वपतिप्रयाताादिलिंगाविशेषादित्यर्थः अनेके
ति तत्रापि सोमघटितानेकदेवत्ये चतुरक्षरे वाग्नीषोमदेवत्यस्य इंद्र घटितानेकदेवत्येप्यक्षरे वाऐंद्राग्नस्य
ति व्यवस्था नचाग्नेय इत्यादाविव प्रत्यगतस्याग्न्यादेः संख्याविशेषस्यानवगमात्कथमेकदेवत्यत्वनिर्णय इति
शंकते कथमिति वाक्यशेषादि अग्नये यत्वे त्याग्नेयवाक्यशेषादेकमेवादिस्यमिति सोर्थवाक्यशेषाद्वैकवचनां
वेन तद्धितविग्रहे तात्पर्यनिश्चयादिति दर्शितमित्यर्थः॥ ॥विप्रतिपत्तौ॥ ॥एवमतिदेशनिपामक निरूपणो
त्तरं तद्बलाबलनिरूपणमवसर इति संगतिः ऐंद्र इति ऐंद्रमेकादशकपालं निर्वपेदिति विहित इत्यर्थः त
थेति आग्नेयं पय इति विहित इत्यर्थः सान्नाय्यस्येति संशय इत्यनुषंगः विशेषेति बलाबलेत्यादिः याग गत
स्याभयत्र साम्यादिति भावः मुख्येति प्रथमनिर्दिष्टत्वेत्यर्थः प्राधान्यमुद्देश्यत्वरूपं आर्थवादिकफलहात्व
रूपं वा हविष इति प्रसमानत्वात प्रधानभूतयागान्वयित्वात् हविषः कर्मणि प्रमासन्निरंतरं गता देवतानु
द्देश मात्रस्य यागविशेषणस्य रूपं विशेषणमित्याशयाद्देश्यस्थितावहिरंगमित्यर्थः हविषः स्वरूपेणाप्य
तसंबंधो देवताया सह वाचकशब्दद्वारेण प्रत्यनेनेव संबध्यते तत्स्वरूपवेत्तापो प्रातिपदिकार्थप्रतीतिवेला
पां आकांक्षाकाल एवाह कर्मेति तत्रैव सान्नाय्ये च तथा चोपघेदाहातेच नाड़ीनांसान्नाय्यधर्माणां बाधः

सात्राप्येचौषधधर्माणामवघातपेषणादीनांबाधः स्यादित्यर्थः पर्यायपक्षे · औषधेतद्धर्माणांसान्नाय्ये
चतद्धर्माणांप्राप्ताविरोधः कर्मणोहविर्निरूप्यत्वादितिसूत्रार्थः॥ ॥हिरण्ये॥ ॥पूर्ववद्धर्मबाधेनप्रस्य
वस्यानासंगतिः हेमनेति प्राजापत्यंघृतेचरुंनिर्वपेच्छतकृष्णलमायुष्कामइतिविहितइत्यर्थः उक्त
त्वेति · त्विग्धतपादीनिमत्वसाम्यादित्यर्थः अवघाताद्यबाधावेति उक्तं · विराड्वादिति · विराड्विविक्त
त्वपवमितितमक्ष्येराणिश्लोकरणानितिसूत्रेहरदत्तइत्याह ननुप्राजापतिदेवताकत्वमात्स्यसादृश्यमधिक
मतआह चरुशब्देति · तथाचचोदनागतचरुशब्दरूपलिंगोत्तोदृष्टिते उत्सादृश्यमेवबलवदितिभाव
॥ ॥मधूदके॥ ॥दधिमधुघृतंपयोधानाउदकंतंडुलास्तत्संसृष्टंप्राजापत्यमितिचित्रेष्टिवाक्येविचारः
अत्रप्रजापतिदेवताकत्वमप्यधिकंद्रष्टव्यं॥ ॥इतिश्रीआपस्तंबसद्धर्मचंद्रसूरिसूनुवैद्यनाथकृतायांटार
दीपिकाव्याख्यायांप्रभाख्यायांमष्टमाध्यायस्यप्रथमःपादः॥ ॥वाजिने॥ ॥पूर्वपादेतद्धितनिर्दिष्टेक
देवतानिर्वपतिमत्वादिस्पष्टलिंगेरतिदेशउक्तः इहत्वस्पष्टेतेतिरच्यतइतिपादभेदआनंतर्यंचतेयं · लिंगास्य
ष्टताचानुपदमेवस्फुटीकरिष्यते · वाजिनइति · वाजिभ्योवाजिनमितिविहितइत्यर्थः प्रशंसेति · तथाचस्मि राम
न्मेवकिंचित्सादृश्यमादायपत्त्युपपत्तेर्निर्धर्मुदेशगताग्निहोत्रादिनाप्यवसाध्यसादृश्यपरत्वाभावान्त्रा १५

तिदेशकत्वमिति भावः। हविःसामान्यादिति। वाजिनसोमयोः प्रयोगो हि तन्यत्वात्तदुपस्थापकतया तद्ध
र्मातिदेशनियामकत्वमिति सारायः। अतएव वाजसिद्धांतसूत्रे हविषा वाजिनि यस्येत तद्विकारत्वादिति। इदं येवास्य
प्रहं लिंगस्येति तेयं सूचेताच्छ्याद्युपस्यवाजिनमूरयोः सोमरादप्रयोगादित्यर्थः॥ ॥ पञ्चुः॥ ॥ इष्टिविका
रत्वप्रसंगात्तद्धि शेषः पशौ चिंत्यत इति संगतिः। उक्तमिति। पशौ चलिंगदर्शनादित्यत्रेत्यर्थः। प्रत्यक्षसादृश्याभावा
दाहसान्नाय्यहोति। अप्रत्यक्षमपि पशुतन्यत्वरूपं सादृश्यं तन्यतनकभावघटितत्वादंतरंगतयोपस्था
पकमित्यर्थः। लिंगमप्याह। उरवेति। यदि पशुनूरनाप्यांघ्वयमानः स्वकेदेदि मन्वाह्यादित्यर्थः॥ ॥ दध्न॥ ॥
गतिमत्त्वमिति। अन्यनोदनां विनागतिमत्त्वमित्यर्थः॥ ॥ आमिक्षा॥ ॥ पूर्ववद्दधिविकृतित्वनिरासाद्वातिदे
शिकी संगतिः। विध्यंतसमुच्चयपतिकल्पयोः पूर्वमेवनिरासादुभयातिकारइति सूत्रानुपपत्तिमाशंक्यत
दुपपादयति। दधीति। हविष्प्रकृत्वेहि विध्यंतसमुच्चयो निरस्तः। इह नु हविषो द्विरूपत्वाद्विध्यंतद्वयप्राप्त
मिति भावः। विशेषं दर्शयन् द्वितीयपर्वमक्षमाह। तमइति। गुणात इति। गुणाभूते प्रथमपातात्रसिः। सापदे। सा
वैश्वदेवीति तस्य दं सिद्धांतमाह। पयस्यत्विति। तत्र पर्यमस्यामान्यनकर्षिरोदध्नः समाप्तितः प्रामः पर्यव

सानादिति यावत्· एतदेवाह· द्वयाहोर्त्ति· संप्रदानवत्· मैत्रावरुणाय दंडं प्रयच्छतीत्यत्र मैत्रावरुणावत्· पय
सि काठिन्यासंभवमाशंक्याह· तद्वेति· प्रातरिमनेनसघत्का नतोपपद्यते रक्ताः· चतुर्थ्ये तु पयः प्राधान्य
मत्रसिद्धमेवोक्तं· दधिप्राधान्येप्यामिक्षाद्रव्यायनप्रयोजिका नत्वेवाजिनमित्यर्थसिद्धेरितिनपोनरुक्त्यं·
॥ ॥सत्त्रमहीनश्च॥ ॥आम्निभायाद्यनुभयरूपत्वाद्व्यवस्थायामपि द्वादशाहस्योभयरूपत्वान्न द्वि
कृतानव्यवस्थेतिशंकांप्यानात्संगतिः आसनोपायिचोदितं सत्त्रं यजतिचोदितोहर्गणोऽहीनइत्यनादि
प्रयोगसिद्धं द्वादशाहे चद्वयमप्यस्तीति द्विकृतानव्यवस्था धर्माणां· नचसत्त्राहीनसंज्ञाभेदाद्विशेषः
द्वादशाससत्त्रकर्मणाय कत्वेन द्वादशाहवदितिदेशवाक्यस्योभयसाधारणादिति· पूर्वपक्षाशयः सि
द्धांतमाह· सत्त्रस्यैवेति· साहस्रवशात्सत्त्रेषु सत्त्रद्वादशाहवदित्यहीनेषु हीनद्वादशाहवदिति मित्रवा
क्यशेषकल्पनादिति भावः वस्तुतः सत्त्वनिमित्तानामहीनेष्वहीनत्वनिमित्तानां च सत्त्रेषु निमित्ताभा
वादेवप्रवृत्तेः फलतइयंव्यवस्थेत्याहुः॥ ॥अन्यतरतः॥ ॥सत्त्रधर्मातिदेशः क्वचिदाख्यासमाधीय रा॰प
तइतिसंगतिः पंचदशेति· त्रिवद्ग्निष्टुद्ग्निष्टोमः त्रिरात्रः· दशरात्रः उदयनीयोतिरात्रइतिपंचदशरात्र १६

स्या तः क्रमेः कुंडपायिनामयनेप्यंते उद्गनीयोतिरात्र इत्यर्थः पूर्वपक्षमाह तत्रेति उपरिः अंते पश्चांते
तिरात्रस्तत्राहीनः वैद्विरात्रादिष्वनुमानमित्यर्थः पदन्यत रतोतिरात्रस्ते नाहीन इति वाक्यशेषस्यापनक्षमत्व
मिदं समर्थ तमाहने वामिति तेनाहीन इत्यर्थः वादेत्वात्त्रनियामकमिति भावः सत्त्रे त उक्तेषु न्यतरतोतिरात्रे
षु अहीनत्वं दर्शना तेनाहीन इति वाक्य इत्यर्थः॥ ॥इति श्रीमन्नन्सपूज्यचरणसूरिवरात्मजवैद्यनाथकृता
यां शास्त्रदीपिकाव्याख्यायां प्रभाख्यायामष्टमस्य द्वितीयः पादः॥ ॥हविर्गणो॥ ॥अत्र गणविशेषविष
यविचारमाह भेदेन चरुमिति तत्पन्नेनत दम धर्मकत्वात् पोक्तमिति शेषः स्थानेति क्रमस्य हविः संबंधितया
देवतासामान्यान्मानवत्वमिति भावः देवतेति शब्द स्वाविरपेक्षत्वाच्चेत्यर्थः प्राथम्यादिकं वर्णमध्यमितर
निरूप्यतयासापेक्षं चैति दुर्बलमित्यर्थः परं हविरुत्तरस्यपुरुषमाद्यमाद्यस्य देशसाम्यादिति सूत्रार्थः॥॥
गणचोदनाय॥ ॥जनकेति जनकसप्तरात्रेगाय गतेति विहितइत्यर्थः त्रिवृदिति त्रिवृत्स्तोमकानि अग्निष्टो
मस्तोकोक्थ्यवेश्याहोयेषांता ति त्रिवृदादीनामिति त्रिवृत् पंचदशः एकविंश इति चतुर्णामित्यर्थः पू
र्ववदिति पूर्वत्र प्राथम्यवादिक यथाप्रचपत्वस्य वादशाद्द तया दुर्बलत्व तद्वसंघातोपीत्यर्थः नेवामि

सप्तदशः

 ति॰ चत्वारि प्येकपदवोध्येषु समूहप्रतीतेरव्यु मन्त्रिसिद्धत पाशाव त्वामिप्रायः एतदु पोद्वलनकं लिंग माह॰ एवंचे
 ति॰ आधस्य॰ षड्हेगता घस्याङ्ग॰ अत्र चतुर्णां प्रवक्ता वपि वाच निक त्रिव हो नबा भाष्य चहु रादीनाम प्रवक्ता
वपित इति रिक्तधर्मी ति देशो ज्ञेयः॥ ॥कालाध्वापासे॥ ॥पूर्वत्र च चारीमस्यैव समारोप वेतीमस्यापिप
पक्षनिवे शितया आवस्यपो गास्यं कोस्या नमिति संग तिः चतुर्विंशत्यामिति॰ बस्यां चतुक्षे चतुर्दिशस्य
हा निमवेतीत्यर्थः एतच्च पूर्वपक्ष कोधेतर्गत मेवननु भाभिनिर्दैशाकं॰ सिद्धांतेषड्हस्यैकस्या हृत्या चतु
र्विंशतेरकामभावात॰ तत्रैति॰ चत्वारः षड्हा इतिपतश्चोधं तेऽनश्च तुर्विंशतिरित्यर्थः संख्यापाः पृ पक्षनि
वैशित्वेनावस्य पोगान्न पासौ चतुः षड्हइतिस्तु च प्रथमपायत्ते श्चोतिभा वः साआदिति॰ चतुर्विंशति संख्या
याअश्रुतत्वादित्यर्थः॰ प्रथमक्षेराक्ष तेवषड्हेशद्वेनचोदितश्चतुः संख्या विशिष्टतया विहिता इत्यर्थः॰ न
च संख्यायाः पृ पक्षनिवेशितावाइहांचतुर्विंशतित्वे॰ पृथगाख्यातजवरोनभिन्नवाक्यत्वात्पड्संख्या वि
शिष्टतयानिशातेषु चतुः संख्यायाआव॰ तिसंपाद्यस्यप्रयाजै कादशत्ववच्चायासिद्धत्वात॰ एकवाक्यत्वे 
पि च षड्त्वाविशिष्टचतुष्ट्वान्वयेन विशेष्यतावच्छेदकषट्त्वस्य॰ पृथगभावगतत्वादुक्तान्यायेनाक्षे 

सिद्धेः एवंच मानांतरेणा प्राप्तवगते न सुच प्राप्तयापेक्षेति भावः शी घ्रमिति षड् हेशाब्दवत्तरूपद्दिगादित्यर्थः
॥ ॥संस्थागणेषु॥ ॥चतुः शब्दवच्छतशब्दोप्यावृत्तिपर इति शंको ध्यानासंगतिः नमेवेति · स्तोत्रियामपेवोक्थ्या
नि रात्रशब्दाभ्यामस्य घशतावृत्तिरूपगुणाप्राप्तविधानेनाघतान्तु संख्यासंस्थो भयविशिष्टपूर्वकर्मविधि
गौरवादिति भावः उपादेयइत्यनेन प्रकरणांतरन्यायाभावः सूचितः सिद्धांतमाह संस्थेति · उक्थ्यादिस्तोत्रक
तसमाप्तिवाचका इत्यर्थः संनिध्यभावेनः पूर्वकर्माप्रत्यभिज्ञानात् अपूर्वकर्मविधिरित्यर्थः द्वाद
शाहेति · तत्तत् द्वादशरात्रविध्यंतोद्दशकृत्वः प्रवर्त्तत इत्यर्थः।सत्रे कृतान्त भगणस्य कृतो क्थ्यादिसंज्ञस्य ग्रहणा
दित्यर्थः॥ ॥गणांत॥ ॥इष्टकृतमिति · दाशमिकन्यायेनोत्कृष्टप्राप्तमित्यर्थः अनेन पूर्वाधिकरणोपन्यासावने
न प्रवर्त्तेः संगतिः सूचिता तस्मिन्नोति · द्वादशाहगत इत्यर्थः अपि तः प्रथमदशमस्थानयोः मध्ये वपायाक्थ्याः
उक्थ्य संस्थापयेति · अग्निष्टोमस्तोत्राणि तत्र मनुष्ठापयमानया वृद्धिप्राप्तशायीयौ · सर्वे बाध्य उक्थ्य संस्था तथा औप
देशिकत्वादित्यर्थः विकारा इत्यत्र स्तोत्राणां विशेषः अत्र फलमाह नेष्विति · प्राकृते [illegible] ध्यः स्तोति
षोडिके ध्यः अग्निष्टोमतो क्थ्याद्धौ नैतदिति · उक्थ्य शब्देन प्रकृतमनपेक्षाणां ज्योतिष्टोमगतानामेव प्रय
प्रयुक्ति तिर्नतु प्रकृतिसापेक्षाणां · द्वादशाहगतानामित्यर्थः तदाह नहीति · नयत्राति तिद्दशानीति न

शा॰ दी॰ यत्रातिदेशाइति वा पाठः अतिदिशाइति पाठे तु पदार्थाभिप्रायं पुंस्त्वमवगन्तव्यं ॥ ॥गायत्रीषु॥ ॥अत्र सं
१८ गतिमधिकरणानेनेष्यति संख्यामात्रेति प्राकृतमधिकरणान्यायेनेत्यर्थः चोदकस्य मेनामंततद्वाधाभावो
ऽपि हेतुरुक्तः गायत्रीशब्दस्य संख्यामात्राभिधायित्वे लिंगमप्याह तथा चेति द्वात्रिंशदक्षरासिंह्वोऽनुष्टुभ
स्तत्रैकैकस्या अष्टवक्षराणाय पोषस्य चतस्रश्चतुर्विंशत्यक्षरा गायत्र्यो भवंतीत्यर्थः सर्वत्रैवेत्यस्यार्थं कथ्यते
नं तत्रांतरइति असौ गायत्रीशब्दः गौणाइति अनुष्टुप्शब्दसामानाधिकरण्यात्संख्यासाम्येन तत्स्वमर्थो गौ
णाइत्यर्थः मुख्यतइति प्रथमांतात्तसिः सूत्रार्थस्तु गायत्रीषु विहितासु प्राकृतीनामवच्छेदोऽत्र ह्रोपः प्रा
कृतीनामविकारासंनिधानात् यथा शतातिरिक्तोपविस्य त्रद्वादशाहिकानामहामुक्थ्यावेन्नोपः संख्यायप्रा
प्यतिरेका गायत्रीशब्देनाच्यतमिति ॥ ॥ इति श्रीमदनंतसदुपाख्यरामचंद्रसूरिवरात्मजतद्वेष नायकृतायां शा
स्त्रदीपिकाव्याख्यायां प्रभायां षष्ठाध्यायस्य तृतीयः पादः ॥ ॥दर्वि॥ ॥संगतिमाह प्रपंचितइ
ति तत्प्रधानत्वात् दर्व्याहोम इति तत्पुरुषस्य होमप्रधानत्वात् यागहोमइति यद्देकथ्येतितदर्थेना
द इत्यर्थः होमत्वापत्तेः होमत्वप्राप्तेः पश्विति गुणाभिधानं स्यात् दर्व्यापदेशादिति सूत्रेणेत्यर्थः चोद्य राम
मात्रमिति ननु किं सहोमि पर्यः तदाह तत्रेति सर्वाग्निचयामन्नदर्व्यादर्व्याज्जुहोतीतिलौकिकेषु प्रा १८

शा. दी.
१८

भिः वैदिकेपि दर्व्याद्युद्यमोदनादुद्धृत्य पूर्ववेदिसेक वचने मध्यायेतिजुहोतीति दर्वीप्राप्तिरिति तत्स्वरूपं व्याप्या
येन यसिद्धं नामत्वं तद्देवनत्लौकिकानामाचारग्रहणादिति सूत्रे शेषोपसंहृतमित्यर्थः। अग्न्यपसव्योक्त
त्वाद्युपसंहारे किं:॥ ॥सयनम्॥ ॥इध्मादीनामिति। अप्रतिष्ठितावेव त्र्यंबकाद्यसाधुर्नेध्माबर्हिः
संनह्यतेइतीध्मादीनामभावस्यार्थवादे सिद्धवदनुवादादित्यर्थः इध्मादीनामंगप्रधानसाधा
रणपान्नादिषु होमांगतो किं: लिंगांतराच्चेति। सोमापविकृतित्वमिइत्यर्थः। पयोदुंबर्यामाप्यहो
मे भूमिगते स्वाहाकारं करोतीत्याहाकारदर्शनं सोमपविकारत्वे। नुपपन्नं वषट्कारस्य सोमाप्या
येत्यादौ नातिसंक्षेपः॥ ॥ इति श्रीमत्तत्सदापचंद्रसूरिवरात्मजवैद्यनाथकृतायां शा
स्त्रदीपिकाव्याख्यायां प्रभाख्यायामष्टमोध्यायः संपूर्णः॥ ॥ ॥ ॥ ॥ ॥

राम
१८

१५